59 a) Dg1 T3 G1 M अगस्त्योपि Ś1 Ñ1 D1-3 तत क्रोधाद् , G2 तथा दिव्यै , M1 तदा विप्रै (for तदा देव) —b) G2 महर्षिभि (for °र्षिणा) Ś1 D1-3 आगत्य(D1 °म्य) भ्रातुराश्रमे(Ś1 D2 °म), Ñ1 आगत्य स निशाचर , Dg1 T3 G1 M [प्रार्थितोय महर्षिभि (M1 °ह्यानृषि) —Dg1 reads in marg 59cd —c) Ś1 Ñ1 D1-3 [ए]कदा (for किल) D2 M2 3 श्राद्ध —d) K(ed) सु- (for स) Ś1 Ñ1 Dm1 D1-3 8 G3 M1 निशाचर (for महासुर) —For 59-60b, Ñ2 V B D5 7 subst 171*

60 a) Dg1 तत्सपन्नमित्युक्त्वा तु —b) Dg1 (m also) D4 T1 2 Cr g k दत्त्वा(D4 om) हस्तोदकं ततः, Dt1 D6 दत्त्वा हस्तेवनेजन, G3 दत्त्वा हस्तावशोधन & Ct हस्तोदक दत्त्वा &—For 59-60b, Ñ2 V B D5 7 subst

171* ततस्तु भक्षितान्श्रुत्वा ब्राह्मणानृषिसत्तम ।
आगच्छत्त्वरितस्तत्र यत्र तौ पापकारिणौ ।
अगस्त्यमागत दृष्ट्वा प्रहृष्टौ तावथोचतु ।
तूर्णमामन्त्र्य सहितौ भगवन्भुज्यतामिति ।
एवमुक्तस्तु स मुनिर्नैर्ऋताभ्यामनिन्दित । [5]
प्रतिगृह्य वचस्ताभ्या वाढमित्यब्रवीन्मुनि ।
प्रत्युवाच ततश्चेनमिल्वल प्रहसन्निव ।
कथ हि मेषमेकस्त्र भक्षयिष्यसि ब्राह्मण ।
तमुवाच ततो विप्र प्रहसन्निव राक्षसम् ।
अह तु भक्षयिष्यामि सर्वमास्थापयस्व मे । [10]
क्षुधितोऽह दानवपते त्वनश्नन्बहुला समा ।
शक्ष्यामि मेषमेकोऽपि श्राद्धे भोक्तुमह सुखम् ।
अगस्त्यस्य वच श्रुत्वा चेत्वलो वाक्यमब्रवीत् ।
वाढमेव विधास्यामि भक्ष्यता यदि शक्यते ।
ततस्त कल्पित भक्ष्य वातापि मेषरूपिणम् । [15]
भक्षयामास भगवानित्वलस्य स पश्यत ।
ततो जुहाव मनसा गङ्गा भागीरथीमृषि ।
सा तस्य वचनात्तूर्ण प्रविवेश कमण्डलुम् ।
प्रच्छन्न जलमादाय जप्येनोपस्पृशन्मुनि ।
निरवशेष त मेष स गृहीत्वा द्विजोत्तम । [20]
तमदन्तमविज्ञाय मुनि परमकोपनम् ।

[(1 1) Ñ2 D5 7 तान् (for तु) D5 दृष्ट्वा (for श्रुत्वा) V1 ब्राह्मणेर् (for °णान्) —(1 2) V1 अगच्छत् , B1 आगतस् (for आगच्छत्) V1 त्वरित, V2 त्वरतश् V2 B2 चैव (for तत्र) D5 आगच्छतानन्तरितस्य (for the prior half) D5 तत्र (for तत्). Ñ2 D5 7 पापकारिणौ —(1 3) V2 B2 कृत्वा (for दृष्ट्वा) —After the prior half of 1 3, V2 wrongly repeats the post half of 1 2 and the prior half of 1 3. —(1 4) B2 भक्ष्यताम् (for भुज्य°). —(1 5) V2 B1-3 स एवमुक्तस्तु (by transp) B2 निर्ऋता° (for नैर्ऋताभ्याम्) —(1 6) V1 ततस् (for वचस्) B4 प्रगृह्य वचन ताभ्यां (for the prior half) —(1 7) V1 इत्वण. (for °ल) —(1 8) Ñ2 D5 7 एक (for एवम्) V1 B1 2 4 (m. also, orig as above) व द्विज (for मुनिः) —(1 9) B2 स इत्वल् (for प्राह°) —(1 10) V2 B2 आस्यतां सर्व(V2 °वस्व मे), B3 (sup lin) आज्ञाप° (for आस्थापयस्व मे). Ñ2 D5 7 सर्वं मास पचस्व मे(Ñ2 म), B4 (m also, orig as above) म मृ मृषाचस्व म (for the post half) —(1 11) Hypm Ñ2 V B दानपते (for दानवपते) B1 तस्मा, B3 (sup lin also as above) निश्चल् (for क्षुधार्त) B3 बहुत , B4 मुहुर् (for बहुला) Ñ2 D5 7 निरा उषु समा , V1 अनश्नन्निवसाम्यहम् (with hiatus), V2 क्षुधार्त * * * * (illeg) (for the post half) —B2 reads 1 12 (var) twice —(1 12) V1 भक्ष्यामि, B3 (first time) शक्नोमि (for शक्ष्यामि) V2 मेषमेक * (illeg) V1 मुनौ (for मुनिम्) B3 (second time in marg) शक्ष्यामि मेषमेक वै क्षुधा भोक्तु सिरा सुख —(1 13) V2 illeg from अगस्त्यस्य up to चेत्व Ñ2 V1 इत्वलो (Ñ2 °ले) (with hiatus), B1 D5 7 इत्वलो (all with hiatus), B2 चेत्वले (for चेत्वलो) —(1 14) B3 (m also) कामम् (for वाढम्) B1 वधिष्यामि भक्ष्यस्व (for विधास्यामि भक्ष्यता) —(1 15) B1 2 तु (for त) V1 मेष (for भक्ष्य). —(1 16) V2 illeg up to स्य स V1 इत्वलस्य B1 4 च (for स) —(1 17) Ñ2 illeg for ततो जुहा B1 जगाम (for जुहाव) V1 मुनि —(1 18) V2 B2 3(sup lin also as above) 4 वरदा (for वचनात्) Ñ2 पविवेश (for प्रविवेश) —(1 19) V1 प्रच्छन्न Ñ2 D5 7 आदाय (for आदाय) V1 जपेन (for जप्येन) Ñ2 B2 4 D5 7 [उ]पास्पृशन्, V2 illeg. (for [उ]पस्पृशन्) —(1 20) Ñ2 समृत्वा, V1 B4 गृहीत्वा स (by transp) B1 भुक्त्वा तु (G[ed] भुक्ते) द्विजसत्तम (for the post half) V2 निरवशे * * * * * द्विजसत्तम (illeg) —(1 21) B3(sup lin also) तमगस्त्यम् (for तमदन्तम्) V1 B2 स विज्ञाय, B1 ज्ञाताय, B3 अज्ञाय (for अविज्ञाय) B1 परमकोपिन]

—Note hiatus between ' and d —c) Ś1 Ñ2 V1 B2-4 D1-3 5 7 निष्क्र(V1 D1 3 नि क्र)मेत्युचैर्, Ñ1 V2 निक्रमस्वेति —d) V इत्वण , Dg1 T3 G1 चेत्वल (to avoid hiatus), D3 इत्वल (sic) Ñ1 D5 7 प्रत्यभाषत, Ñ2 V B Dt1 D6 समभा° (for सोऽभ्यभा°)

तं तथा भाषमाणं तु भ्रातरं विप्रघातिनम् ।
अब्रवीत्प्रहसन्धीमानगस्त्यो मुनिसत्तमः ॥ ६१
कुतो निष्क्रमितुं शक्तिर्मया जीर्णस्य रक्षसः ।
भ्रातुस्ते मेषरूपस्य गतस्य यमसादनम् ॥ ६२
अथ तस्य वचः श्रुत्वा भ्रातुर्निधनसंश्रितम् ।
प्रधर्षयितुमारेभे मुनिं क्रोधान्निशाचरः ॥ ६३

सोऽभ्यद्रवद्द्विजेन्द्रं तं मुनिना दीप्ततेजसा ।
चक्षुषानलकल्पेन निर्दग्धो निधनं गतः ॥ ६४
तस्यायमाश्रमो भ्रातुस्तटाकवनशोभितः ।
विप्रानुकम्पया येन कर्मेदं दुष्करं कृतम् ॥ ६५
एवं कथयमानस्य तस्य सौमित्रिणा सह ।
रामस्यास्तं गतः सूर्यः संध्याकालोऽभ्यवर्तत ॥ ६६

G 3 16 38
B 3 11 68
L 3 14 24

61 ^{a}) B4 Dm1 D8 Γ2 M3 तं तदा, Dg1 Dt1 D6 T3 G1 स तदा (for त तथा) Ñ2 D5 7 च (for तु). Ś1 Ñ1 D1–3 हू(D1 3 ह्व)यमान तु, D8 (marg except तु) भीषण त तु (for भाषमाण तु) K(ed) स त तथा भाषमाण —^{b}) B4 (m also as in text) रिपुघातिन, Dg1 विप्रघातक, D5 7 ब्रह्मघातिन (for विप्रघातिनम्) Ś1 Ñ1 D1–3 राक्षस मेष (D1 3 विप्र)रूपिण —^{c}) Ñ1 illeg for अब्रवीत् D2 ग्राहसन् Ś1 Ñ1 D1–3 श्रीमान्, Ñ2 V B D5 7 M2 3 वाक्यम् (for धीमान्) —^{d}) V2 illeg for गस्त्यो मुनि Dm1 D8 G3 मुनिपुगव (for °सत्तम)

62 Ñ1 om 62^{ab} —^{a}) Ś1 निष्क्रामितु, V1 D1–3 नि क्र (D3 °क्रा)मितु (for निष्क्र°) —^{b}) B4(marg also as in text) मम, D1 यथा (for मया) Ñ2 V B D5 7 भुक्तस्य (D5 °स्तु) (for जीर्णस्य) —^{c}) Ñ2 V2 Dt1 D4 6 तु (for ते) Ñ1 भ्राता ते मेषरूपोथ —^{d}) Ñ1 गतो हि (for गतस्य) Ñ2 V B D5 7 निष्क्र(V1 नि क्रा, V2 निष्क्रा)मो नोपपद्यते —After 62, Ñ2 V B D5 7 ins

172* भक्षित हि मया रक्षो न ह्यस्य पुनरागमम् ।
सेन्द्रा देवगणा कुर्युरिति मे निश्चित मन ।

[(1 1) B3 reads हि in marg V1 भक्षितस्य (for °त हि) B1 पुनरागम —(1 2) V2 निश्चिता मति (for °त मन)]

63 ^{a}) Dg1 D8 M2 तद्वचन, G3 तद्व*** (damaged) (for तस्य वच) Ś1 Ñ1 D1–3 त(Ñ1 अ)थैतद्वचन श्रुत्वा, Ñ2 V B1–3 Dm1 D5 7 G1 अगस्त्य(Dm1 आर्तस्तद्)वचन (G1 °च॰) श्रुत्वा, B4 अगस्त्यस्य वच श्रुत्वा —^{b}) Ñ1 D3 -शकित, Ñ2 V B D5 7 -दु खित, K(ed) Cg सश्रय (for -सश्रितम्) Ś1 D1 2 मरणशकित, G1 2 M2 3 निधनमाश्रित —^{c}) B4 प्रदर्शयितुम् —^{d}) Ñ2 V1 B D5 7 क्रुद्धो (for क्रोधान्)

64 ^{a}) B4 अभ्यद्रवद्, Dm1 D8 G3 सोभिद्रवद्, K(ed) सोभिद्रवन् Ñ2 V B D5 7 द्विजद्रोही, D4 T1 2 द्विजश्रेष्ठ, G2 द्विजेद्र तु, K[ed]मुनिश्रेष्ठ (for द्विजेन्द्र त) Ś1 Ñ1 D2 3 अभ्यद्रवदगस्त्य तु, D1 अभ्यधावन्नगस्त्येन —^{b}) Ñ2 V B(B4 marg) D5 7 मुनिमदीप्ततेजस(B4 [orig] °चेतस) —^{c}) Ś1 Ñ1 [आ]दित्यकल्पेन, D1 दिव्यक°, D2 3 दीप्तक°, T3 निर्विक° (for [अ]नलकल्पेन) —^{d}) G3 निर्धनो (for °र्दग्धो) Ś1 D1–3 स पपात ह, Ñ1 निपपात ह (for निधन गत) —For 64^{cd}, Ñ2 V B D5 7 subst

173* चक्षुषा तस्य तीव्रेण निर्दग्धो भस्म चाभवत् ।

[Ñ2 D5 तेन (for तस्य) V2 illeg for the post half V1 भस्मशोभवत्, G(ed) भस्मसादभूत्]

—Thereafter cont

174* ब्रह्मघ्नौ नाशयित्वा तु राक्षसौ पापकारिणौ ।
आश्रम प्रवर विप्रो न्यवेशयत धर्मवित् ।
तस्य सदृश्यते तात आश्रम पुण्यकर्मण ।
बहुपुष्पफलोपेतो विविक्त प्रचुरोदक ।

[(1 1) V2 illeg from ब्रह्मघ्नौ up to पाप B1 च (for तु) —After l 1, B4(l 2–4 in marg) ins

174(A)* इदमाह तदा विप्रो ब्राह्मणान्ब्रह्मवादिन ।
अद्य प्रभृति ये विप्रा मामान्यश्चन्ति लोलुपा ।
सर्वधर्मबहिर्भूताश्चाण्डालादपि चाधमा ।
विन्ध्यात्सागरपर्यन्त दक्षिणस्या दिशि स्थिता ।

—(1 2) V D5 7 आश्रम, B3 स्वाश्रम —(1 3) V2 B4(m also) भ्रातुर् (for तात) —(1 4) B1–3 विविक्त- B1 प्रवरोदक (for प्रचु°) V विरिक्त प्रवृवेदिक (sic) (for the post half)]

65 D2 om 65-66^{b} —^{a}) Ñ2 V B D5 7 दिव्यतेज -प्रभारम्यस्(V °भोरस्य, B °भावस्य) —^{b}) Ś1 Ñ V2 B D1 3 5 7 तडाग, V1 तलाग- (sic) G2 -धनमाश्रित (for -वनशोभित) —^{c}) Ś1 G [अ]नेन(G3 after corr as in text) (for येन) —^{d}) Ñ2 V B D5 7 M2 3 कर्मेतद् (for °मेंद) V2 illeg for दुष्कर कृत. V1 दु कर, B3 4 Dg1 D4 M2 दुष्कृत (for दुष्कर) Dg1 reads in marg, D6 कृते (for कृतम्) Ś1 Ñ1 D1 3 कृत कर्म सुदुष्क(D1 °दु क)र

66 D2 om 66^{ab} (cf v l 65) —^{a}) G3 damaged for एव क Ck तथा (for एव) Ś1 Ñ V B D1 3 5 7 कथयत-स्तस्य —^{b}) Ś1 Ñ1 D1 3 तदा (for तस्य) Ñ2 V B D5 7 राघवस्य महात्मन —^{d}) Ś1 D1–3 [स]भवत्तदा (for ऽभ्यवर्तत) —For 66^{cd}, Ñ2 V B D5 7 subst

175* जगामास्त तदा सूर्य सध्या च समजायत ।

[B1 3 गत, B4 तत (for तदा) V2 illeg for the post half]

उपास्य पश्चिमां संध्यां सह भ्रात्रा यथाविधि ।
प्रविवेशाश्रमपदं तमृषिं चाभ्यनादयत् ॥ ६७
सम्यक्प्रतिगृहीतस्तु मुनिना तेन राघवः ।
न्यवसत्तां निशामेकां प्राश्य मूलफलानि च ॥ ६८
तस्यां रात्र्यां व्यतीतायां विमले सूर्यमण्डले ।
भ्रातरं तमगस्त्यस्य आमन्त्रयत राघवः ॥ ६९

अभिवादये त्वा भगवन्सुखमध्युषितो निशाम् ।
आमन्त्रये त्वां गच्छामि गुरुं ते द्रष्टुमग्रजम् ॥ ७०
गम्यतामिति तेनोक्तो जगाम रघुनन्दनः ।
यथोद्दिष्टेन मार्गेण वनं तच्चावलोकयन् ॥ ७१
नीवारान्पनसांस्तालांस्तिमिशान्बकुलान्धवान् ।
चिरिबिल्वान्मधूकांश्च विल्वानपि च तिन्दुकान् ॥ ७२

67 V2 illeg for 67^{ab} —^{a}) Ś1 Ñ1 D1-3 उपास्य सध्या तत्रैव(Ñ2 धर्मात्मा), Ñ2 V1 B D5-7 तत्रोपास्य तत (V1 °दा) सध्या —^{b}) M2-3 भ्रात्रा सह (by transp) —^{d}) Ñ2 V B D2 5-7 मुनि त, D6 ऋषीश् (subm) (for तमृषि) V1 चाभिवादयन्, Dg1 D4 Γ G1-2 M1-3 सोभ्यवादयत् Ś1 प्रभावादभ्यनादयत्

68 ^{a}) Ś1 Ñ1 B2-4 D1-5-7 T1-2 च, Dm1 D3 Γ3 G3 M1 स (for तु) —^{b}) V1 सत्कृत (for राघव) —^{c}) Ś1 वसतश्च (sic), V1 अवसत्ता, D3 निव° (for न्यवसत्ता) Ñ2 V B D5-7 तत्र (for एका) —^{d}) Ś1 D1-2 प्राप्य, I2 प्राज्य (sic) D2 मूल, D6 जल- (for मूल-) Ś1 Ñ1 D1-3 M2 -फल शुभ, Ñ2 V B D5-7 -फल शुचि (for -फलानि च). —After 68, Ñ2 V B D5-7 ins

176* ततस्तु ते तेन महात्मना सम
समेत्य सम्यञ्जुनिना यथाविधि ।
सुखोपितास्तत्र निशाक्षये पुन-
स्तपस्विन द्रष्टुमभिप्रतस्थिरे ।

[(1 1) B2 reads ते *sup lin* B3-4 तेनैव (for ते तेन) D6 om सम B2 महात्मनास्या (for °ना सम) —(1 3) V1 अधोषितास् (for सुखो°) V2 B4(marg also as above) निशाक्षये —(1 4) D6 तपस्वि (sic) (for °स्विन) D7 -प्रतस्थिते]

—Then Ñ2 V B D5-7 ins an addl colophon, while Ś1 Ñ1 D1-3 ins the same after 68

[*Sarga name* Ś1 D1 इत्वलोपाख्यान, Ñ1 D3 अगस्त्यभ्रातुराश्रमनिवास , Ñ2 V B D5-7 अ(G[ed]आ)गस्त्यभ्रातुर्(V B °तृ)दर्शन, D2 दण्डकारण्यनिवासे इत्वणोपाख्यान —*Sarga no* (figures, words or both) Ś1 Ñ1 B1 D2 om , Ñ2 V2 B3 D5-7 16, V1 15, B2-4 D1 17, D3 18]

69 ^{a}) Ñ2 D7 रात्र्या तस्या (by transp), G3 damaged (for तस्या रात्र्या) —^{b}) Ś1 Ñ1 Dt1 Dm1 D1-3 6 8 G3 M1-2 उदिते (for विमले) Ñ2 V B D5-7 [S]भ्युदिते रवौ, Dt1 D6 रविमडले (for सूर्य°) —Note hiatus between ^{c} and ^{d} —^{c}) Ś1 Ñ V B D1-3 5-7 अगस्त्यभ्रातरमृषिम्(Ś1 D1-2 °र धीमान्, Ñ1 D3 °र श्रीमान्) —^{d}) V अमन्त्रयत, D6 I3 आमन्त्रयति (sic), G2 ह्यामन्त्रयत (to avoid hiatus)

70 ^{a}) Hypm Ś1 D1-4-8 I1 G1-2 त्वा, Ch t as in text (for त्वा) Ñ2 V B D5-7 आमन्त्रये त्वा (for अभिवादये त्वा) —^{b}) Ś1 Ñ1 B2-4 Dg1 Dt1 Dm1 D1-4-6-8 T G2 M1 अस्म्यु(G[ed]भ्यु)षितो, V1(m as in text) M2 अभ्युषितो, D7 अभ्युषितां B1 सुख सुखो निशामिमा —^{c}) Dm1 D1-8 G3 आमन्त्रयित्वा, I3 M आमन्त्रये त्वा —^{d}) Ś1 Ñ1 D1-3 द्रष्टु ते गुरुम् (by transp.), Dm1 गुरु ते द्रष्टम्. —For 70^{cd}, Ñ2 V B D5-7 subst.

177* द्रष्टुमिच्छाम्यगस्त्यं हि भ्रातरं तेऽग्रजं मुनिम् ।

[V1 अगस्त्य द्रष्टुमिच्छामि (by transp) (for the prior half) D7 अग्रजं (for तेऽग्रजं)]

71 G3 damaged for ^{a} —^{d}) B1 पश्यताम् (for गम्य°) D1 [उ]क्ष, D2 [उ]क्ष —^{b}) Ś1 Ñ1 D1-3 सह लक्ष्मण (for रघुनन्दन) —^{c}) Ś1 [उ]दितेन, D1-8 [ना]दिष्टेन (for [उ]द्दिष्टेन) —^{d}) D3 तत्र (for तच्च). M2 वने तस्मिन्विलोकयन् —For 71^{c-d}, Ñ2 V B D5-7 subst

178* यथोपदिष्टेन पथा गच्छन्नमवलोकयन् ।

[B3 यथोपदृष्टेन V2 च पथा(hypm.) (for पथा) B3 (marg also as above) सम्यगवलोकयन् (for the post half)]

—B3 cont

179* तपस्विना च स्थानानि विविक्तानि च राघव ।

72 Ñ2 V B D5-7 om 72 M2 transp 72^{ab} and 72^{cd}. Ñ1 illeg for 72^{ab} —^{a}) Dt1 Cm g निचारान्. Dm1 D3 G3 तिमिशाश् (for पनसास्) Dg1 शालास्, Dt1 D4-6 M सालास्, Dm1 D8 G3 चेव, G1 नीपास् (for तालास्) —^{b}) Dm1 D8 G3 पनसान्, Ch k तिमीशान्, Ct तिनिशान् (for तिमिशान्) I2 G1-3 वकुलान् (for बकुलान्) Dg1 T3 निचुलान्तिलि(T3 °मि)शान्धवान , Dt1 D6 बकुलास्तिनिशास्तथा, D4 बकुला °न्धवान्, Γ1 तिमि* — ** (illeg), G2 M बकु(G2 M3 °चु)लान्तिमिशान्धवान्(M3 °शानपि) —For 72^{ab}, S1 D2 subst

180* नीवाराश्चैव नीपाश्च कुलस्थाश्च मनोहरान् ।

[D2 वारिरान्कुलत्थांश्च (for नीपाश्च कुल°)],

whereas D1-3 subst .

पुष्पितान्पुष्पिताग्राभिर्लताभिरनुवेष्टितान् ।
ददर्श रामः शतशस्तत्र कान्तारपादपान् ॥ ७३
हस्तिहस्तैर्विमृदितान्वानरैरुपशोभितान् ।
मत्तैः शकुनिसङ्घैश्च शतशः प्रतिनादितान् ॥ ७४
ततोऽब्रवीत्समीपस्थं रामो राजीवलोचनः ।
पृष्ठतोऽनुगतं वीरं लक्ष्मणं लक्ष्मिवर्धनम् ॥ ७५
स्निग्धपत्रा यथा वृक्षा यथा क्षान्ता मृगद्विजाः ।
आश्रमो नातिदूरस्थो महर्षेर्भावितात्मनः ॥ ७६
अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा ।
आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः ॥ ७७
प्राज्यधूमाकुलवनश्चीरमालापरिष्कृतः ।
प्रशान्तमृगयूथश्च नानाशकुनिनादितः ॥ ७८
निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ।
दक्षिणा दिक्कृता येन शरण्या पुण्यकर्मणा ॥ ७९
तस्येदमाश्रमपदं प्रभावाद्यस्य राक्षसैः ।
दिगियं दक्षिणा त्रासाद्दृश्यते नोपभुज्यते ॥ ८०

G 3 17 2
B 3 11 8
L. 3 15 1

181* वानीराश्च तिमीराश्च कपित्थान्वञ्जुलान्धवान् ।

—^{c}) Dm1 D3 G2 चिर, D8 चीर- (for चिरि-) —^{d}) Dg1 Dt1 D6 T3 अथ (for अपि) Dm1 D8 प्रकीर्यानपि (for विल्वानपि च) Ś1 Ñ1 D1-3 तिदुकाश्चापि पुष्पितान्, G3 प्रकीर्या[illegible] (damaged) —After 72, Ś1 Ñ1 D2 3 read 74^{cd}

73 Ñ2 V B D5 7 transp (along with star passages) 73^{ab} and 73^{cd} —^{a}) G3 damaged for पुष्पितान् D6 reads in marg from ताम्राभिर् up to 74^{b} —^{b}) Ś1 D2 वल्लीभिर् (for लता°) Ñ1 अववेष्टितान्, Dt1 D6 उपशोभितान्, Dm1 D8 G3 M1 परि°, M2 3 अभि° (for अनुवेष्टितान्) V2 लता[illegible]तान् (illeg) —After 73^{ab}, Ñ2 V B D5 7 ins

182* स दृष्ट्वा कानन रम्य पथि गच्छन्महायशा ।

[B3 दिव्य (for रम्य) B1 2 यत्र (for गच्छन्)]

—^{c}) Ñ1 पश्यस्तु सर्वतो याति —^{d}) V B फुल्ल- (for तत्र) Ñ1 D1 3 कानन- (for कान्तार-) Ś1 D2 तत्र पादपसचयान्, Ñ2 D5 7 प्रफुल्लास्ताश्च पादपान् —After 73^{cd}, Ñ2 V B D5 7 ins a passage relegated to App I (No 2)

74 D6 reads 74^{ab} in marg (cf v l 73) Ñ2 V B D5 7 om 74 —^{a}) Dg1 विमर्दितान् (for विमृदि°) Ś1 D2 हस्तिहस्तप्रमथि(D2 °मृदि)तान् —^{b}) Ñ1 D1 3 चोप (D1 चापि)शोभितान् —D1 om (hapl) 74^{cd} Ś1 Ñ1 D2 3 read 74^{cd} after 72 —^{d}) Ś1 Ñ1 Dm1 D2 3 8 G3 सनि(Dm1 D8 [after corr as in text] G3 प्रवि)-नादितान्, K(ed) च प्रणादितान्

75 ^{a}) D3 6 समीपस्थो(D6 °स्थ-) Ñ2 V B D5 7 अत्र (D5 °)वीच्च पुनस्तत्र —^{b}) Ś1 राम पाणी धुवन्मुहु, D2 राम· पानीयजेक्षण —^{c}) D2 [s]नुगम (for °गत) Ś1 Ñ1 D1-3 G3 M2 ग्रह, Dt1 वीर- (for वीर) Ñ2 V B D5 7 पृष्ठानुग दाशरथि(B4 °थिर्) —^{d}) Ś1 D2 शुभदर्शन, Ñ1 D1 3 शुभलक्षण (for °वर्धनम्) —After 75, Ñ2 V B D5 7 ins

183* पश्य सौम्य यथाभ्यासे नन्दनप्रतिम वनम् ।
रमणीय च सौम्य च यथेद दीप्यते पुन ।

[V1 om (hapl) 1 1 —(1 2) Ñ2 D5 7 तथा (for यथा) B3(*sup lin* as above) 4 पुर (for पुन)]

76 ^{ab}) B4 reads पत्रा यथा in marg L(ed) तथा (for first यथा) G2 3 तथा (for second यथा) Dt1 वृक्षाता (sic), Dm1 D8 G3 क्षात-, G1 Cm शाता (for क्षान्ता) Dg1 D6 G1 M2 मृगा (for मृग-) Ś1 Ñ2 V B D1-3 5 7 यथा कात(B1 रम्य, D3 क्षात)तरा मृगा (for ^{b}) Ñ1 पश्य भ्रातुर्वन रम्य तथा कातत्तरान्मृगान् —^{c}) Ñ2 V B4 D5 7 अग्रतो (for आश्रमो)

☞ V2 illeg from नाति up to st 91 B2 D2 नास्ति (for नाति-) Ś1 Ñ V1 B D1-3 5 7 दूरे(Ś1 Ñ1 V1 °रो)सौ —^{d}) Ś1 Ñ V1 B D1-3 5 7 तस्य विश्रुतकर्मण

77 V2 illeg (cf. v l 76) —^{a}) Ś1 Ñ2 V1 B2 4 D1-3 5 7 य ख्यातो (for विख्यातो) —^{b}) Ś1 Ñ V1 B D1 2 5 7 पुण्येन, D3 विश्रुत-(for स्वेनैव) —^{c}) Dg1(before corr) M2 3(before corr) तत्र (for तस्य) —^{d}) Ñ2 V1 B D5 7 -सुखावह, Dg1 -श्रमावह (for -श्रमापह)

78 V2 illeg (cf v l 76) —^{a}) Ñ V1 B Dm1 D1 3 5 7 8 T3 G1 M1 3 Cm(also as in text) आज्य-, Dt1 प्रजा- (sic), D2 अग्नि- (for प्राज्य-) Ś1 वृक्षमालाकुलवनो· —^{b}) Ś1 D2 वल्कमालाविभूषित —^{c}) Dg1 विश्रात- (for प्रशान्त-) G3 -मृगयूथैश् —^{d}) Dm1 D8 G3 -सकुल (for -नादित)

79 Cf 3 10 52 V2 illeg (cf v l 76) —^{a}) Ś1 विगृह्य Ś1 Ñ1 V1 B D1-3 5 7 T3 तपसा (for तरसा) —^{b}) Ś1 Ñ1 V1 B2-4 D2 3 5 7 M2 भूताना, B1 भृताना, D1 सूताना (sic) (for लोकाना) —^{d}) Ś1 कर्मणा, D6 -कर्मिणा

80 V2 illeg (cf v l 76) G2 om (hapl) 80-81^{b} —^{a}) Ñ2 V1 B Dm1 D1 3 5 7 8 G3 [ए]तद् (for [इ]-दम्) —^{b}) V1 तस्य, Dg1 Cm अस्य (for यस्य) —^{c}) Ñ2 V1 B D5 7 तात (for त्रासाद्) —^{d}) Ś1 Ñ1 D1-3 पापेनैव (for दृश्यते न) Ś1 B1-3 Dg1 Dm1 D8 [उ]पयुज्यते, G1 [उ]पपद्यते (for °भुज्यते)

Arya Research Team

3 17 21
3 11 83
3 15 13

यदा प्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा ।
तदा प्रभृति निर्वैराः प्रशान्ता रजनीचराः ॥ ८१
नाम्ना चेयं भगवतो दक्षिणा दिक्प्रदक्षिणा ।
प्रथिता त्रिषु लोकेषु दुर्धर्षा क्रूरकर्मभिः ॥ ८२
मार्गं निरोद्धुं सततं भास्करस्याचलोत्तमः ।
संदेशं पालयंस्तस्य विन्ध्यशैलो न वर्धते ॥ ८३
अयं दीर्घायुपस्तस्य लोके विश्रुतकर्मणः ।
अगस्त्यस्याश्रमः श्रीमान्निनीतमृगसेवितः ॥ ८४

एष लोकार्चितः साधुर्हिते नित्यं रतः सताम् ।
अस्मानधिगतानेष श्रेयसा योजयिष्यति ॥ ८५
आराधयिष्याम्यत्राहमगस्त्यं तं महामुनिम् ।
शेषं च वनवासस्य सौम्य वत्स्याम्यहं प्रभो ॥ ८६
अत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
अगस्त्यं नियताहारं सततं पर्युपासते ॥ ८७
नात्र जीवेन्मृषावादी क्रूरो वा यदि वा शठः ।
नृशंसः कामवृत्तो वा मुनिरेष तथाविधः ॥ ८८

---

81 V2 illeg (cf v l 76) G2 om 81^{ab} (cf v l 80) —^{a}) M1 च क्राता (for चाक्रान्ता) —^{c}) Ñ2 V1 D5 7 सर्वेस्या, B1 सर्वेस्य, B2-4 सर्वेषा (for निर्वैरा) —^{d}) D1 3 G3 प्रशान्त- (for °न्ता) G2 पिशिताशना

82 V2 illeg (cf v l 76) —^{a}) G1 निम्ना (for नाम्ना) 1 2 3 भगवता —^{b}) G1 om दिक् Ś1 D1-3 प्रकाशते, Ñ2 B1 D7 प्रकीर्तिता, V1 सुदक्षिणा, B2 प्रवर्तिता (for प्रदक्षिणा) B3 (*sup lin* after corr as in text) दिक्षु दक्षिणा —^{c}) B3 कथिता D2 विक्त (sic) (for त्रिषु) Ś1 प्रसिद्धा त्रिष्णुलोकेषु —^{d}) Ñ2 B3 4 दुष्प्रेक्षा, V1 B1 2 दुष्प्रेक्ष्या, D5 दु प्रेक्षा, D7 दु प्रेक्ष्या (for दुर्धर्षा) Ś1 D3 दुष्प्र (D3 °रा)धर्षा निशाचर, Ñ1 D1 2 दुरा (D2 दु प्र)धर्षा क्षपाचरै

83 V2 illeg (cf v l 76) —^{a}) M1 Cg निरत (for सतत) —For 83^{ab}, Ś1 Ñ V1 B D1-3 5 7 subst

184* क्रोधात्प्रवृद्धः सुमहान्भास्करस्य नगोत्तम ।

[D1 प्रक्रोधात् (hypm) D2 प्रवर्ष (for °वृद्ध) D3 तु महान D1 शिलोच्चय (for नगोत्तम) Ś1 Ñ1 D3 त (Ś1 य)स्य नाम्ना शिलोच्चय, D2 पश्य नाम शिलोच्चय (for the post half)] —^{c}) Ś1 Ñ V1 B D1-3 5 7 आदेश, D8 सदेशे, T1 2 G2 निदेश (for सदेश) D8 T1 2 G3 यस्य, G2 अस्य (for तस्य) Ś1 D1 2 पालयत्येव (D1 °त्यस्य), D5 पालयन्नस्य —^{d}) Ñ1 V1 D1 2 5 M2 विन्ध्य शैलो D7 om न Ñ वर्धते —After 83, Ñ2 V1 B D5 ins

185* समुद्रमपिबच्चापि तिमिनक्रसमाकुलम् ।
दानवाना विनाशार्थं देवै सेन्द्रै प्रसादित ।

[(1 1) V1 मीन- (for तिमि-) B1 -शपाकुल (for समा°) —(1 2) D5 विनाशार्थ (for °र्थं).],
whereas M2 ins

186* सुमेरो स्पर्धया विन्ध्यो वर्धिष्णुर्मुनिना पुरा ।
लोकाना हितकामेन भूमे साम्यमथो गत ।
कायासुरस्य सहारमिच्छतोऽस्य महामुने ।
क्रोधा समुद्रो हस्ताब्जमकरन्ददशा गत ।

81 V2 illeg (cf v l 76) —^{b}) M2 3 विख्यात- (for विश्रुत) Ś1 Ñ1 D1-3 प्रथित (Ś1 °सिद्ध) पुण्यकर्मण (D1 2 °णा) —For 84^{ab}, Ñ2 V1 B D5 7 subst

187* तस्याय दीप्ततपसो लोके विख्याततेजस ।

[B4 प्रख्याततेजस]

—^{c}) D8 आगस्त्यस्य —^{d}) Ñ2 B D3 5 7 -मुनि-, Dg1 D4 S (except G2 3) -जन- (for -मृग-)

85 V2 illeg (cf v l 76) Ś1 om 85^{ab} —^{a}) Ñ1 एव, Ñ2 V1 B D5 7 देव- (for एष) D2 लोकार्चने B1 D5 साधु- (for साधुर्) —^{b}) Dg1 D1 T G2 Cg नित्य-, Dm1 D8 G3 चाभि-, M1 चापि (for नित्य) Ñ2 सत (sic) (for रत) M2 हितेष्वभिरत सता (from ष्व to स *inf lin sec m*) —^{c}) Ś1 अपि मतान, Ñ2 V1 B Dg1 D1 3-5 7 T1 3 G1 2 M अभि (G2 °पि)गतान् (D3 °त), D2 अनुग°, D8 G3 इहाग°, Ct as in text (for अधिगतान्) Ś1 Ñ1 D1-3 सौम्य, T2 एव (for एष)

86 V2 illeg (cf v l 76) —^{a}) B1 च, T2 G2 [अ]द्य (for [अ]त्र) —^{b}) Ś1 मुनिसेवित, Ñ1 B1 D1 2 मुनिसत्तम, Ñ2 V1 B2-4 D5 7 ऋषिसत्तम, D3 मुनिपुगव (for तं महामुनिम्) —^{d}) Dm1 D8 G3 सुख, Cm *gp* प्रभो, Cv g t as in text (for प्रभो) Ś1 Ñ1 D1 2 तत्र वत्स्यामहे (Ñ1 °म्यह) सुख, D3 सौम्य वत्स्यामहे सुखे ❀ Ck सर्वत्रोशेषु सवुध्यन्त तथा पाक्त पाठ । हे समर्थ शुश्रूषणचतुरेति यावत् ❀ —For 86^{cd}, Ñ2 V1 B D5 7 subst

188* वनवासस्य शेष च काल वत्स्यामहे वयम् ।

[B1 transp शेषं and काल]

87 V2 illeg (cf v l 76) V1 repeats 87^{ab} (var) after 91^{ab} —^{a}) M2 सगवर्च- (after corr *sec m* as in text) —^{b}) Ñ2 V1 (second time) B D5 7 सभूता (B3 [*sup lin* also] °रक्षा, B4 °यक्षा.) सहचारणा, V1 (first time) सिद्धा परमर्षयस्तथा (hypm) —Ñ2 B1-3 D5 7 om, B4 reads in marg 87^{c}-88 —^{c}) Ś1 नियतारभ, Ñ1 B4 Dg1 Dt1 D3 6 T3 G1 नियताहारा (for °हार) —^{d}) D6 सतत (for सतत).

88 V2 illeg (cf v l 76) Ñ2 B1-3 D5 7 om, B4 reads in marg 88 (cf v l 87) —^{a}) V1 नानु- (for नात्र) D3 जीवो (for जीवेन्) —^{b}) Ś1 Ñ1 D1-3 पापो वा,

अत्र देवाश्च यक्षाश्च नागाश्च पतगैः सह ।
वसन्ति नियताहारा धर्ममाराधयिष्णवः ॥ ८९
अत्र सिद्धा महात्मानो विमानैः सूर्यसंनिभैः ।
त्यक्त्वा देहान्नवैर्देहैः स्वर्याताः परमर्षयः ॥ ९०
यक्षत्वममरत्वं च राज्यानि विविधानि च ।
अत्र देवाः प्रयच्छन्ति भूतैराराधिताः शुभैः ॥ ९१
आगताः स्माश्रमपदं सौमित्रे प्रविशाग्रतः ।
निवेदयेह मां प्राप्तमृषये सह सीतया ॥ ९२

G 3 18 2
B 3 11 94
L 3 15 44

इति श्रीरामायणे अरण्यकाण्डे दशमः सर्गः ॥ १० ॥

V1 नापरो (for क्रूरो वा) B4 G(ed) क्रूरो नैवागतो(G[ed] नैकृतिको) शुचि —^{c}) B4 Dt1 D6 पापवृत्तो, Cg as in text (for काम°) —^{d}) Ś1 Ñ1 V1 D1-3 ह्येष, B4 ह्येव (for एष) G(ed) अनिष्णो(°ष्टो?) यस् (with hiatus) (for मुनिरेष)

89 V2 illeg (cf v l 76) —^{ab}) M3(after corr *inf lin sec m* as in text) अथ (for अत्र) G3 स- (for first च) Ś1 Ñ1 V1 D1-3 अत्र यक्षा (V1 °ज्ञा [sic]) पिशाचाश्च (for ^{a}) G1 transp यक्षाश् and नागाश् D1 पतगाश्च सहस्रश (for ^{b}) —For 89^{ab}, Ñ2 B D5 7 subst, while V1 ins after the second occurrence of 87^{ab}

189* पन्नगा गुह्यकाश्चैव तथा विद्याधरादय ।

—^{d}) Ñ2 V1 B D5 7 मुनिम् (for धर्मम्) G1 धर्माधारा सहिष्णव

90 V2 illeg (cf v l 76) —^{b}) B4 भानुसनिभै, M2 सूर्यवर्चसै —^{c}) Ś1 Ñ1 Dg1 D2 3 G2 M1 त्यक्त्वा देह, D4 T1 2 त्यक्तदेहा D1 त्यक्त्वा देह विदेहास्ते —^{d}) V1 B3 (orig) सूर्याभा (B3[*inf lin* also]°भै) (for स्वर्याता) Ś1 Ñ1 D1-3 स्वर्गं(D1 °र्गै) याता महर्षय

91 V2 illeg (cf v l 76) Dg1 reads 91^{ab} after 92^{ab} —^{a}) D5 चामरत्व (for अम°) Ś1 D3 वा (for च) —^{b}) Ñ2 V1 B D5 7 च धनानि च, G(ed) च विधानि च —After 91^{ab}, V1 repeats (var) 87^{ab} —^{c}) D2 प्रेक्ष (sic) (for अत्र) —^{d}) Ñ1 D1-3 वरैर्, G3 M1-3 व्रतैर् (for भूतैर्) D4 T3 G1 M3 आराधितै (for °धिता) Ś1 L(ed) वरानाराधितान्(L[ed]°ता) शुभान् —For 91^{cd}, Ñ2 V1 B D5 7 subst

190* नराणामत्र भगवान्विदधे तपसा विभु ।

[B4 भगवन् (for °वान्) Ñ2 D5 7 विधत्ते (for °दधे) B3 तापसा]

—Then all the above MSS cont

191* एव स राजेन्द्रवरो ब्रुवन्गुणा-
नृषेरगस्त्यस्य चिराय राघव ।
प्राप्त क्रमाद्वारमथाश्रमस्य
तत्र स्थितो दीक्षवपुर्महात्मा ।

[(1 1) B1 3 राजेन्द्रवचो(B3 °सुतो) Ñ2 om गुणान् B4 गुणानृषेर् (for ब्रुवन्गुणान्) —(1 2) B4 ब्रुवन् (for ऋषेर्) B2 विहाय (for चिराय) —(1 3) Ñ2 B3 प्राप्त-, D5 7 प्राप्त (for प्राप्त) —(1 4) V1 यत्र, B2-4 तत (for तत्र)]

92 Ñ2 V B D5 7 read 92 (preceded by 194*) before 3 11 1 —^{a}) V B सप्राप्ता (for आगता) B2 3 Dg1 स्वाश्रम- M2 -द्वार (for -पद) Ś1 Ñ1 D1-3 अगस्त्यस्याश्रम-द्वार, Ñ2 D5 7 सप्राप्तमाश्रमपद —^{b}) Dg1 reads in marg विशाग्रत G1 लक्ष्मण त्व विशाग्रत —After 92^{ab}, Dg1 reads 91^{ab} Ś1 om from 92^{cd} up to 3 11 4^{b} V2 illeg for 92^{cd} (except सीतया) —^{c}) Ñ2 V1 B D1-3 5 7 M2 च (for [इ]ह) Dm1 D8 G3 M1 निवेदयस्व B2 सप्राप्तम् (for मा प्रा°) Ñ1 **।य(illeg) त्व मा प्राप्तम् —^{d}) D3 ऋष्यग्रे (for °षये) D1 4 T1 2 G1 M1 सीतया सह (by transp) —After 92, B3 ins

192* दर्शन तव इच्छामि ज्ञाया ते द्विजोत्तम ।

[Note hiatus between the two halves], whereas D2 ins

193* विदित सप्रवेदयामि द्रष्टु मुनिवर स्वयम् ।

[L(ed) त्वह (for स्वयम्)]

Colophon Ś1 D1 om (cont the Sarga) —*Kāṇḍa name* D2 1 om, Ñ1 B2 आरण्यक°, Ñ2 आरण्ये, V B1 आरण्यके, Dg1 Dt1 Dm1 D3 5 7 8 S आरण्य° —*Sarga name* Ñ V B1 D3 5 7 अगस्त्याश्रमवर्णन(D3 °न), B2-4 अगस्त्याश्रमवर्णना, D2 दडकारण्ये अगस्त्याश्रमवर्णन —*Sarga no* (figures, words or both) Ñ1 B1 D2 om, Ñ2 V2 B3 D5 7 17, V1 16, B2 18, B4 15, Dg1 Dt1 Dm1 D4 6 8 S 11, D3 19 —After colophon, G concludes with श्रीरामाय नम

Arya Research Team

११

3 18 3
3 12 1
3 16 1

स प्रविश्याश्रमपदं लक्ष्मणो राघवानुजः ।
अगस्त्यशिष्यमासाद्य वाक्यमेतदुवाच ह ॥ १
राजा दशरथो नाम ज्येष्ठस्तस्य सुतो बली ।
रामः प्राप्तो मुनिं द्रष्टुं भार्यया सह सीतया ॥ २
लक्ष्मणो नाम तस्याहं भ्राता त्ववरजो हितः ।
अनुकूलश्च भक्तश्च यदि ते श्रोत्रमागतः ॥ ३
ते वयं वनमत्युग्रं प्रविष्टाः पितृशासनात् ।
द्रष्टुमिच्छामहे सर्वे भगवन्तं निवेद्यताम् ॥ ४
तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य तपोधनः ।
तथेत्युक्त्वाग्निशरणं प्रविवेश निवेदितुम् ॥ ५
स प्रविश्य मुनिश्रेष्ठं तपसा दुष्प्रधर्षणम् ।
कृताञ्जलिरुवाचेदं रामागमनमक्षमा ॥ ६
पुत्रौ दशरथस्येमौ रामो लक्ष्मण एव च ।
प्रविष्टावाश्रमपदं सीतया सह भार्यया ॥ ७

11

Ś1 cont the previous Sarga D8 begins with ॐ, T2 with श्रीरामचन्द्राय नम , M1 with श्रीरामाय नम —Before 1, Ñ2 V B D5 7 ins (followed by 3 10 92)

194* स्थितस्त्वमरसंकाशो महाबलपराक्रम ।
राघव सह वैदेह्या लक्ष्मण वाक्यमब्रवीत् ।,

while D1 ins

195* विदित सप्रवेक्ष्यामि द्रष्टु मुनिवर त्वयम् ।

1 Ś1 om 1–4^{b} (cf. v l 3 10 92) Before 1, Ñ2 V B D5 7 read 3 10 92 —^{a}) D2 सप्रविश्य (for स प्र^{o}) —^{b}) Ñ V B D1–3 5 7 -[आ]श्रया (for -[अ]नुज) —^{c}) V1 B2 आदाय (for आसाद्य) D3 5 अगस्त्यमृषिमासाद्य —^{d}) Ñ1 D1–3 L(ed) श्लक्ष्ण वचन(L[ed]मुदार)मब्रवीत्

2 Ś1 om 2 (cf v l 1) —V2 illeg from म in 2^{c} up to द्रष्टु in l 1 of 197* —^{c}) Ñ1 D1–3 इह (for राम) —^{d}) Dm1 D8 G3 M1 transp भार्यया and सीतया —For 2^{cd}, Ñ2 V B D5 7 subst

196* रामो नाम महाभाग मुनि द्रष्टुमिहेच्छति ।

3 Ś1 om 3 (cf v l 1), V2 illeg for 3^{ab} (cf v l 2) —^{b}) Ñ2 V1 B D5 7 पृष्ठानुगो, G(ed) तदनुजो (for त्ववरजो) Ñ1 D1–3 मुने (for हित) —After 3^{ab}, Ñ2 V B D5 7 ins

197* सदार स च तेजस्वी मुनि द्रष्टुमिहागत ।
प्रिय सर्वस्य लोकस्य प्रियधर्मश्च स प्रभु ।

[V2 illeg up to द्रष्टु in l 1 (cf v l 2) —(l 1) B1 2 ह (for च) D5 सदाचार स तेजस्वी (for the prior half) —(l 2) V B3 4 प्रिय(B3 °यो)विप्रस्य(V2 B4 °श्च) (for °धर्मश्च) Ñ2 D5 7 स च (by transp)]

—^{c}) Ñ1 Dm1 D1–3 G3 रक्तश् (for -कूलश्) Ñ2 V1 B D5 7 अनुरक्तजनश्चैव —V2 illeg from क्त in 3^{c} up to 4 —^{d}) l3 यथा (for यदि) Ñ2 V1 B1 2 4 D5 7 श्रुतिम्, G3 श्रोत्र (for श्रोत्रम्) B3 यदि श्रुतिसमागत

1 Ś1 Ñ1 om 1^{ab} (for Ś1 cf v l 1), V2 illeg for 1 (cf v l 3) —l or 1^{ab}, Ñ2 V1 B D1–3 5 7 subst

195* ते वय मुनिमुद्दिश्य भगवन्तमुपागता ।

[Ñ2 -गत]

—^{d}) Ñ2 V1 B1 2 4 D3 7 स्वयमाश्रमान्नद्दामुनि(V1 °ने), B2 स्वप्रमाद्राम् °मुनि

5 ^{a}) Ś1 गोत्र (sic) (for श्रुत्वा) —^{b}) Ś1 Ñ1 D1–3 महात्मन (for तपोधन) —^{c}) Ñ2 V B D5 7 [आ]श्रमपद (for [अ]ग्निशरण) —^{d}) Ś1 Ñ V1 B2–4 D1–3 5 7 निवेदक , V2 illeg (for निवेदितुम्)

6 V2 illeg for 6 —^{a}) l3 स- (for स) D1–3 प्रवि (D2 °ष्टौ) ष्टौ (for प्रविश्य) Ś1 D1–3 मुनिवर (for °श्रेष्ठ) Ñ2 V1 B D5 7 प्रविश्य चाग्निशरण —^{b}) Ñ2 V1 B D5 7 तमृषि (for तपसा) Ś1 Dm1 D1–3 5 G3 योनितप्रभ, V1 Dt1 D8 तु प्र^{o} (for दुष्प्रधर्षणम्) Ñ2 ऋषि दृष्ट्वा प्रहर्षण (sic) —^{c}) G2 om (h.pl ?) 6^{d}–7^{c} —^{d}) Ś1 Ñ1 Dm1 D1–3 5 G1 वचन व्यक्तया गिरा, Ñ2 V1 B D5 7 वचन (D7 [illegible]) रूक्षया गिरा —After 6, Dg1 Dt1 Dm1 D4 6 8 Γ G1 3 M ins

199* यथोक्त लक्ष्मणेनैव शिष्योऽगस्त्यस्य सम्मत ।

[Cg t यथेद (for यथोक्त) G1 सज्जन , G3 धनेन (for संमत)]

7 G3 om 7^{abc} (cf v l 6). —^{d}) M1 सीतया च तपोधन —For 7, Ś1 Ñ V B Dm1 D1–3 5 7 8 G1 3 subst

200* पुत्रो दशरथस्यासौ रामो नाम महायशा ।
सह भ्रात्राश्रमद्वारि भार्यया सह तिष्ठति ।

[(l 1) Ś1 Ñ1 D2 [अ]य, Ñ2 D5 7 [अ]त्र, D1 3 [अ]ग (D3 °य) (for [अ]सौ) —(l. 2) Ś1 Ñ D1–3 प्राप्तो (for -द्वारि) Dm1 D8 G1 3 [आ]श्रमपद, D1 सन प्राप्तो (for [आ]-श्रमद्वारि) Ś1 Ñ1 D1–3 सीतया (for भार्यया) D1 3 चारि (for second सह) Dm1 D8 G1 3 सीतया सह भार्यया (for the post half)]

द्रष्टुं भवन्तमायातौ शुश्रूषार्थमरिंदमौ ।
यदत्रानन्तरं तत्त्वमाज्ञापयितुमर्हसि ॥ ८
ततः शिष्यादुपश्रुत्य प्राप्तं रामं सलक्ष्मणम् ।
वैदेहीं च महाभागामिदं वचनमब्रवीत् ॥ ९
दिष्ट्या रामश्चिरस्याद्य द्रष्टुं मां समुपागतः ।
मनसा काङ्क्षितं ह्यस्य मयाप्यागमनं प्रति ॥ १०
गम्यतां सत्कृतो रामः सभार्यः सहलक्ष्मणः ।
प्रवेश्यतां समीपं मे किं चासौ न प्रवेशितः ॥ ११
एवमुक्तस्तु मुनिना धर्मज्ञेन महात्मना ।
अभिवाद्याब्रवीच्छिष्यस्तथेति नियताञ्जलिः ॥ १२
ततो निष्क्रम्य संभ्रान्तः शिष्यो लक्ष्मणमब्रवीत् ।
कासौ रामो मुनिं द्रष्टुमेतु प्रविशतु स्वयम् ॥ १३
ततो गत्वाश्रमपदं शिष्येण सह लक्ष्मणः ।
दर्शयामास काकुत्स्थं सीतां च जनकात्मजाम् ॥ १४
तं शिष्यः प्रश्रितं वाक्यमगस्त्यवचनं ब्रुवन् ।
प्रावेशयद्यथान्यायं सत्कारार्हं सुसत्कृतम् ॥ १५
प्रविवेश ततो रामः सीतया सहलक्ष्मणः ।
प्रशान्तहरिणाकीर्णमाश्रमं ह्यवलोकयन् ॥ १६

3 18 21G
B 3 12 17
L 3 16 16

8 V2 illeg for 8 —a) Dg1 आयातौ, Dm1 D8 G3 आयात (for आयातौ) Ś1 Ñ V1 B D1-3 5 7 भवतमिच्छति द्रष्टु, G1 भवत द्रष्टुमायात —b) Ś1 Ñ V1 B3 Dm1 D1-3 7 8 G1 3 अरिदम, B1 2 4 इहागत (B4 also आगत), D5 M1 अरिदम (for अरिदमौ) —c) B2 विचार्य, D5 यदश (sic) (for यदत्र) M3 damaged for नन्तर Ś1 Ñ V1 B D1-3 5 7 कार्यम्, G1 कर्तुम् (for तत्त्वम्) —d) Ñ2 V1 B D5 7 तदाज्ञापय मे (V1 मा) मुने

9 a) Ś1 D3 4 G2 उपाश्रुत्य, D8 (also) स सश्रुत्य (for उपश्रुत्य)

10 V2 illeg from श्रि in 10a up to प्रति in 10d —a) D1 दिव्या, D6 दिष्ट्वा (sic) (for दिष्ट्या) Ś1 D2 चिरात् (D2 °र) प्राप्तो, Ñ2 B D5 7 महाबाहु, V1 महाराज, D1 3 चिरस्यास्य (for चिरस्याद्य) —b) Ś1 D1-3 समुपस्थित (for समुपागत) Ñ2 V1 B D5 7 सभार्यो मामुपागत —c) M3 [illegible] सा (damaged) V1 B4 D5 7 M2 3 यस्य, G(ed) तस्य (for ह्यस्य) —d) Ñ2 D1 5 7 T2 मया हि, V1 B3 ममापि (for मयापि) Ś1 D2 श्रुतम्, Ñ V1 B Dm1 D1 3 5 7 8 G3 स्वय, D4 T1 2 चिर, Cg k as in text (for प्रति)

11 a) Ś1 D2 भवता (for गम्यता) —b) Ś1 Ñ1 B4 D1-3 ससीत (for सभार्य) G2 3 सहभार्य सलक्ष्मण —c) B3 D1 प्रविश्यता (for प्रवेश्यता) Ñ2 V B D5 7 इति क्षिप्र, D1 2 समीपे मे, G(ed) इह क्षिप्र (for °प मे) —d) B2 रामो, B3 (also *sup lin*) D5 G2 वासौ, Dt1 D6 अथ, D1 2 T1 3 असौ (for चासौ) Ñ2 प्रवेशित, T2 प्रवेशितु (both sic)

12 V2 illeg from क्त in 12a up to ब्रवीत् in 13b —a) Ś1 Ñ1 D1-3 स मुनिना, Ñ2 V1 B D5 7 तदा तेन (for तु मुनिना) —b) Ś1 D1-3 कृतात्मना, Ñ1 [illegible]त्मना, Ñ2 V1 B D5 7 तपस्विना (for महात्मना) —c) Ś1 Ñ1 D1-3 हृष्टस्, B3 4 (marg also as in text) वाक्य (for शिष्यस्) —d) D1 ततस्त (for तथेति)

13 V2 illeg for 13ab (cf v l 12) —a) Dg1 अथो, Dt1 D6 T1 G1 2 तदा (for ततो) Ñ1 V1 D1 3 निःक्रम्य (for निष्क्रम्य) —c) Dt1 D6 कोसौ (for कासौ) Ñ2 V B D5 7 महाबाहु (for मुनि द्रष्टुम्) —d) Ś1 D2 अत्र, D1 स तु, D4 एतत्, M3 एप (for एतु) Ñ2 V B D5 7 सौमित्रे दर्शयस्व मे, D3 उपैतु प्रविशत्विति —After 13, Ñ2 V B D5 7 ins

201* क्व चास्य भार्या वैदेही नित्य भर्तृहिते रता ।
महर्षिवचनात्तात द्रष्टुमिच्छामि तावुभौ ।

[V2 illeg for l 1 and 2 V1 om l 2]

14 V1 om 14, V2 illeg for 14ab —a) Ś1 Ñ B Dg1 D1-5 7 T G2 M1 -द्वार (Ñ2 D5 7 °रि) (for -पद) —D1 om (hapl) 14c-16b —V1 cont after 201*, Ñ2 V2 (illeg from ष्ट्वा in l 1) B D5 7 ins after 14

202* स दृष्ट्वा तमुवाचेद मुनिरिक्ष्वाकुनन्दनम् ।
स्वागत तव राजेन्द्र मैथिल्या लक्ष्मणस्य च ।

15 D1 om 15 (cf v l 14), Ñ1 illeg from श्रि in 15a up to यं in 15c, V2 illeg up to वच in 15b —a) D4 ते (for त) D3 प्रसृतैर्, D4 T1 2 G2 3 प्रश्रितो, D6 प्रश्रित- (for प्रश्रित) Ś1 D2 रामम्, D3 वाक्यैर् (for वाक्यम्) Ñ2 V1 B3 D5 7 इति सप्रश्रयै (V1 B3 °सृतै) र्वाक्यैर्, B1 2 4 इति सप्रसृतै (B2 4 °श्रितै) र्वाक्यैर् —b) Ś1 Ñ2 V B D2 3 5 7 -वचनादथ (Ś1 °नु), M2 3 -वचनाद्ब्रुवन् —Dg1 reads 15c in marg —c) Dg1 D6 प्रवेशयद् (for प्रावे°) —d) B1 D6 M2 सत्काराहं (D6 °हँ-) (for °राहं)

16 D1 om 16ab (cf v l 14) V2 illeg from ततो in 16a up to स्थान in 17b —a) Dg1 तदा (for ततो) —b) Ś1 Ñ1 D2 3 ससीत (Ś1 Ñ1 °ता [sic]) (for सीतया) Ñ2 V1 B D5 7 आश्रम पुण्यकर्मण —c) Ñ2 V1 B D3 5 7 मृगसकीर्ण (for -हरिणा°) —d) Ñ2 V1 B D5 7 समताद् (for आश्रम हि) Ś1 Ñ1 D1-3 प्रविलोकयन्, Dg1 G2 M1 2 व्यवलोकयन्, M3 सोवलोकयन्

Ayya Research Team

Arya Research Team

अभिवाद्य तु धर्मात्मा तस्थौ रामः कृताञ्जलिः ।
सीतया सह वैदेह्या तदा राम सलक्ष्मणः ॥ २२
प्रतिगृह्य च काकुत्स्थमर्चयित्वासनोदकैः ।
कुशलप्रश्नमुक्त्वा च आस्यतामिति सोऽब्रवीत् ॥ २३
अग्निं हुत्वा प्रदायार्घ्यमतिथिं प्रतिपूज्य च ।
वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ ॥ २४

प्रथमं चोपविश्याथ धर्मज्ञो मुनिपुंगवः ।
उवाच राममासीनं प्राञ्जलिं धर्मकोविदम् ॥ २५
अन्यथा खलु काकुत्स्थ तपस्वी समुदाचरन् ।
दुःसाक्षीव परे लोके स्वानि मांसानि भक्षयेत् ॥ २६
राजा सर्वस्य लोकस्य धर्मचारी महारथः ।
पूजनीयश्च मान्यश्च भवान्प्राप्तः प्रियातिथिः ॥ २७

G. 3 18 32
B 3 12 30
L 3 16 28

D1-3 महामुने , Ñ2 V B D5 7 ऋषेस्तदा (for परतप) —For 21^{cd}, Dt1 D6 subst

207* जग्राहापततस्तस्य पादौ च रघुनन्दन ।

22 Ś1 om 22^{ab} (cf v l 19) Ñ1 D1-3 transp 21^{cd} and 22^{ab} Ñ2 V B D5 7 transp 22^{ab} and 22^{cd} —^{a}) G3 च (for तु) Ñ V B D1-3 5 7 यथान्याय (for तु धर्मात्मा) —After 22^{ab}, D5 7 read 27^{ab} —^{c}) D7 damaged for सह —^{d}) Dg1 तथा (for तदा) Ś1 स भ्रात्रा लक्ष्मणेन च, Ñ1 D2 स तु राम सलक्ष्मण , Ñ2 V B D5 7 लक्ष्मणेन च राघव , D1 भ्राता राम सलक्ष्मण , D3 [अ]भ्येत्य राम सलक्ष्मण

23 For 23-26^{b}, Ñ2 V B subst 208*, while D5.7 subst it for 23-25 —^{a}) Ñ1 D2 3 प्रतिगृह्य तु, Dg1 D4 T1 2 G2 3 Cr g k t °जग्राह (for °गृह्य च) G3 त वीरम् (for काकुत्स्थम्) —^{b}) Ñ1 कुशोदकै (for [आ]सनोदकै) —Note hiatus between ^{c} and ^{d} —^{c}) D8 कुशल (for °ल-) Dm1 D8 G3 M1 तम्, M2 (*inf lin sec m*) तु (for च) —^{d}) D4 T1 2 G2 ह्यास्यताम् (to avoid the hiatus) (for आ°) Dg1 D4 T G M1 च (for सो) Ś1 Ñ1 D1-3 निपीदस्वेत्युवाच ह —After 23, Ś1 reads 25^{ab}

24 For subst in Ñ2 V B D5 7, cf v l 23 and 26 Ñ1 D2 3 M2 3 transp 24 and 25, D4 T2 repeat 24^{ab} after 25 —^{a}) D3 अग्नौ Dg1 कृत्वा (for हुत्वा) —^{b}) Dm1 (before corr as in text) Cv r m g k t अतिथीन् T1 प्रतिपूजयन्, T2 (second time) °पूजयेत् —^{c}) Ś1 D1 2 विधिना (for धर्मेण) —^{d}) Ś1 D2 3 तेभ्यो, D1 ताभ्या (for तेषा) T1 illeg for भोजन Ñ1 तेषा दत्त्वा च भोजन

25 For subst in Ñ2 V B D5 7, cf v l 23 and 26 Ñ1 D2 3 M2 3 transp 24 and 25 Ś1 reads 25^{ab} after 23 —D1 om 25^{ab} —^{a}) G2 3 [उ]पविश्य (for [उ]पविश्य) —^{c}) D4 धर्मम् (for रामम्) —^{d}) Ñ1 D3 धर्मज्ञ (for प्राञ्जलि) Ñ1 प्राजलिस्तदा —After 25, D4 T2 (var) repeat 24^{ab}

26 D5 7 read 26 after 27 —^{a}) Ś1 Ñ1 D2 3 5 7 अपूजयन्हि(Ś1 °यित्वा, D2 °यद्धि), D1 आपूजयन्हि (for अन्यथा खलु) D1-3 5 7 काकुत्स्थ(D1 °त्स्थ) (for °त्स्थ) —^{b}) Ś1 Ñ1 D1-3 5 7 तपस्विनमुपागत, D4 G2 3 तपस्वी समुपा(G3 च मुदा)चरन् —For 23-26^{ab}, Ñ2 V B subst , while D5 7 subst for 23-25

208* अभिवादितवन्त च राघव सुमहातपा ।
मूर्धन्युपाघ्राय तदा निपीदेत्यब्रवीन्मुनि ।
दत्त्वासन तदा राम वैदेही लक्ष्मणं तथा ।
अर्चयित्वा तु पप्रच्छ कुशलानामय मुनि ।
पृष्ट्वा चानन्तर शिष्यमुवाचेद वचस्तदा । [5]
अग्नौ हुत्वा हवि पूर्वं शेष रामाय धीमते ।
प्रतिपादय सत्कृत्य मन्त्रवत्प्राश्यतामयम् ।
वानप्रस्थेन विधिना सत्काराहों हि राघव ।
तस्मादेन सक्रियया सत्करिष्येऽहमागतम् ।

[(1 1) Ñ2 D5 7 हि (for च) V1 B3 4 स (for सु-) —(1 2) V1 मूर्ध्नि चाघ्राय च तदा (for the prior half) V1 D7 वच (for मुनि) —V2 illeg from न in l 3 up to शि in l 5 —(1 3) V1 B1 3 दत्तासन (for दत्त्वासन) V1 तथा (for तदा) V1 तदा (for तथा) —(1 4) B3 4 च, D5 तु (for तु) B2 कुशलानि महामुनि (for the post half) —(1 5) Ñ2 D5 7 दृष्ट्वा (for पृष्ट्वा) B2 तथा (for तदा) Ñ2 D5 7 उवाच वचन तदा (for the post half) —V2 illeg from त्रा in l 7 up to य in l 9 —(1 7) V2 B2 प्रतिप्रदाय (for प्रतिपादय) V1 प्राशयत्स्वय, V2 om (for प्राश्यतामयम्). —(1 9) B2 अस्माद् (for तस्माद्) V1 सत्कृपया (for सत्क्रियया)]

—Ñ2 V B transp 26^{cd} and 27 —^{c}) Ś1 भुक्ते य स, V1 Dg1 Dm1 D1 8 दु साक्षी च G1 3 M2 परो (for परे) —^{d}) Ś1 Ñ2 V B D1-3 5 7 खादति (for भक्षयेत्) Ñ1 स्वानि मा*-*दति —After 26, Ś1 Ñ1 B4 D1-3 ins , while Ñ2 V D5 7 cont after 210*, whereas B1-3 cont after 211*

209* यो गृहायातमतिथिं यथाशक्ति न पूजयेत् ।
दत्त्वा स दुष्कृत तस्य पुण्यमादाय गच्छति ।

[V2 illeg. from थि up to पूजयेत् in l. 1 —(1 1) Ñ2 D5 7 यथान्याय (for °शक्ति) —(1 2) Ś1 D1 दत्त्वा सु-, Ñ1 V1 D3 स दत्त्वा (by transp)]

27 D5 7 read 27^{ab} after 22^{ab} —^{a}) D7 illeg for लोकस्य —^{b}) Ś1 Ñ1 D1 2 यत(Ñ1 D1 दृढ)व्रत , D3 धृतव्रत (for महारथ) —^{d}) Ñ1 illeg , V B प्राप्तोय न , D5 7 सम्प्राप्तोय (for भवान्प्राप्त) V1 Dg1 D5 प्रियो(D5 महा)तिथि

G 3 18 36
B 3 12 31
L 3 16. 29

एवमुक्त्वा फलैर्मूलैः पुष्पैश्चान्यैश्च राघवम् ।
पूजयित्वा यथाकामं पुनरेव ततोऽब्रवीत् ॥ २८
इदं दिव्यं महच्चापं हेमवज्रविभूषितम् ।
वैष्णवं पुरुषव्याघ्र निर्मितं विश्वकर्मणा ॥ २९
अमोघः सूर्यसंकाशो ब्रह्मदत्तः शरोत्तमः ।
दत्तो मम महेन्द्रेण तूणी चाक्षयसायकौ ॥ ३०
संपूर्णो निशितैर्बाणैर्ज्वलद्भिरिव पावकैः ।
महाराजतकोशोऽयमसिर्हेमविभूषितः ॥ ३१
अनेन धनुषा राम हत्वा संख्ये महासुरान् ।
आजहार श्रियं दीप्तां पुरा विष्णुर्दिवौकसाम् ॥ ३२
तद्धनुस्तौ च तूणीरौ शरं खड्गं च मानद ।
जयाय प्रतिगृह्णीष्व वज्रं वज्रधरो यथा ॥ ३३

(for प्रिया°) —After 27, Ñ2 V2 B D5 7 read 26(Ñ2 V B 26^{cd}) and then ins, while D3 ins after 27

210* अय सर्वस्य लोकस्य गतिर्नाथश्च राघव ।
लोकनाथमिम प्राप्त पूजयिष्ये यथाविधि ।
अपूजयन्हि काकुत्स्थ तपस्विनमुपागतम् ।

[V2 illeg from स्य in सर्वस्य up to राघव in 1 1 —(1 1) B4 अय(marg also सव) धर्मस्य लोकस्य (for the prior half) D3 मान्यश् (for नाथश्) —V2 illeg from प्रा up to यथा in 1 2 —(1 2) D3 अनु (for इम) —D3 5 7 om 1 3]

—Thereafter Ñ2 V D5 7 cont 209*

28 ^{a}) Ñ1 D1-3 वन्यै (for मूलै) —^{b}) Ś1 वन्यै, Ñ1 D1-3 मूलै (for पुष्पैश्) Ś1 मान्यैश्, Ñ1 D1-3 पुष्पैश्, Ñ2 V B D5 7 अद्भिश्, Dm1 D4 8 Γ2 G M अन्यैश्, T1 वन्यैश् (for चान्यैश्) —^{c}) Ñ2 V1 B1-3 D5 अर्चयित्वा, D7 lacuna (for पूजयित्वा) Ñ2 V B D1 5 7 G1 -न्याय (for -काम) —^{d}) Ś1 Ñ V B Dm1 D1-3 5 7 8 G1 3 M1 पुनरेवाब्रवीद्वच, Dt1 D6 ततोगस्त्यस्तमब्रवीत्

29 V2 illeg from व्य in 29^a up to निर्मित in 29^d —^{ab}) Dt1 इन्द्र- (for इद) Ś1 Ñ1 D1 2 G1 महा- (for महच्) Dm1 D8 Cm रज- (for -वज्र-) Ś1 Ñ1 D1-3 वज्र (Ś1 D2 दृढ)हेमपरिष्कृत (for ^{b}) Ñ2 V1 B D5 7 धनुर्वर-मिद दिव्य वज्रहेमपरिष्कृत —^{d}) T3 पुण्य- (for विश्व-)

30 ^{a}) Ñ2 V B D5 7 अमोघा इषवश्चेमे —^{b}) Ñ2 V B D5 7 G2 ब्रह्म(B2 वज्र)दत्ता (B2 3 दडा) (for °दत्त) Ś1 Ñ1 D1-3 तथा शर, Ñ2 V B D5 7 सु(V1 also स्व in marg)तेजस —After 30^{ab}, Ñ1 ins 213* —^{c}) Ś1 दत्ताव, Ñ1 ददौ (sic), Ñ2 V B2-4 D5 7 दत्ता, Dg1 Dt1 D2-4 G Cv दत्तौ, B1 दत्त्वा (sic) (for दत्तो) Ś1 इमौ, Ñ2 V1 B D5 7 मह्य, D4 म- (for मम) —^{d}) Ś1 V B D1-3 5 7 तूणौ, Ñ2 दूणो (sic) (for तूणी) Ñ1 Dg1 Dt1 Dm1 D1 3 5 6 8 T [अ]क्षय- (for °य-) D1 -सायकै

31 V2 illeg from तै in 31^a up to वि in 31^d —^{a}) V1 D3 M3 (before corr) सपूर्णो, Dg1 सपूर्णे, Dm1 सपूर्णैर् (for सपूर्णो) —^{b}) Ś1 Ñ1 V1 B1 2 D1-3 M2 पन्नगै (for पावकै) —^{cd}) Dg1 Dt1 Dm1 D6 8 T M -रजत- (for राजत).—For 31^{cd}, Ś1 Ñ V1 B D1-3 5 7 subst

211* महाकोशनिवासी च महासिर्हेमविग्रह ।
[Ñ2 D5 7 निवासश् (for °सी) B4 तु (for च)]

—Thereafter B1-3 cont 209*

32 ^{a}) Ś1 Ñ1 D1-3 G2 सौम्य (for राम) —^{b}) B1 महायुद्धे, D4 G2 3 M हत्वा सघे(M1 4 °रे) (for हत्वा सख्ये) D3 ध्वसयित्वा च दानवान् .

33 V2 illeg from तूणी in ^{a} up to यथा in 33^d —^{a}) D4 तस्य (for तौ च) Dg1 Dt1 D6 T3 तूणी च (for °रौ) Ś1 स तद्धनुस्तौ तूणीरौ, V2 इद धनु· स * * · —^{b}) Ś1 D2 3 शरा, Ñ1 D1 शरान् (for शर) —For 33^{ab}, Ñ2 V1 B D5 7 subst

212* इद धनु सतूणीर खड्ग चेम मयोद्यतम् ।
[B1 सतूण च (for सतूणीर) Ñ2 D5 7 चेद, B1 चर्म (for चेम) V1 गम (for मया)]

—^{c}) D5 प्रतिगृहीष्व (for °गृह्णीष्व) —After 33, Ś1 D1 2 M2 3 ins, while Ñ1 ins after 30^{ab}

213* इद च मे तनुत्राणमभेद्य मघवान्ददौ ।
स्पर्शे चानुपम वीर सूर्याग्निसदृशप्रभम् ।
यदा च सशय प्राप्तश्चिन्तयिष्यसि वाहनम् ।
हरियुक्त रथ दिव्यमानयिष्यति मातलि ।

[(1 1) M2 3 ते (for मे) Ñ1 illeg for मघवान् —(1 2) D1 M2 3 स्पर्शन (for स्पर्शे च) D2 [अ]ग्निसम (for [अ]नुपम) D1 -समवर्चसम् (for -सदृशप्रभम्) Ñ1 सूर्य · * · · · (illeg), M2 3 प्रतिगृह्णीष्व मानद (for the post half) —(1 3) Ñ1 illeg up to श M2 3 जये च (for यदा च) M2 3 प्राप्य (for प्राप्तश्) Ś1 चिंतयिष्यति (for °सि) —(1 4) M2 3 -युग्य (for -युक्त) M2 3 उपनेष्यति (for आनयि°)]

—Whereas Ñ2 V B D5 7 ins after 33

214* पुरा चोक्तोऽहमिन्द्रेण सहस्राक्षेण राघव ।
यदा राम इहागच्छेत्तस्मै देयमिद धनु ।
स त्व राम चिरेणासि सप्राप्तो ह्यस्मदाश्रमम् ।
गृहाण तदिद दिव्य धनुर्वरमनुत्तमम् ।
अनेन धनुषा राम कृत्स्नस्य जगतस्तथा । [5]
अविषह्यमपीन्द्रस्य विजेतासि परतप ।

[V2 illeg from l 1 up to य in the post half of l. 2 —(1 1) B1 पुरा चोक्त मर्त्येन (for the prior half) —(1 2) B2 यथा (for यदा) B4 तदा (*inf ln* also

एवमुक्त्वा महातेजाः समस्तं तद्धरायुधम् । | दत्त्वा रामाय भगवानगस्त्यः पुनरब्रवीत् ॥ ३४

इति श्रीरामायणे अरण्यकाण्डे एकादशः सर्गः ॥ ११ ॥

१२

राम प्रीतोऽस्मि भद्रं ते परितुष्टोऽस्मि लक्ष्मण ।
अभिवादयितुं यन्मां प्राप्तौ स्थः सह सीतया ॥ १

अध्वश्रमेण वां खेदो बाधते प्रचुरश्रमः ।
व्यक्तमुत्कण्ठते चापि मैथिली जनकात्मजा ॥ २

G 3 19 3
B 3 13 2
L. 3 17 2

as in text) (for तस्मै) —(1 3) B3 आश्रय (for °मम्) V1 सप्राप्तो ह्याश्रम मम (for the post half)]

34 ^{b}) Ś1 Ñ1 D1-3 समग्र (for °स्त) Ñ2 V B D5 7 सशर तन्महद्धनु —After 34, Ś1 D2 ins

215* स्नेहगद्गदया वाचा हर्षयन्रघुनन्दनम् ।

[D2 हर्षयिष्यन्रघूत्तम (for the post half) = 218*], while Ñ2 V B D5 7 ins

216* धनुषानेन काकुत्स्थ यदा योत्स्यसि सयुगे ।
त्रयाणामपि लोकाना तदा शान्तिर्भविष्यति ।
दत्त्वा धनुश्चैव शराश्च विप्र
खड्ग च तूणौ च पृषत्कपूर्णौ ।
वस्त्रोत्तम चैव ददौ महात्मा [5]
शक्रप्रदत्ते अपि कुण्डले द्वे ।
तद्राघवोऽथ प्रतिगृह्य दत्त
महाप्रदान मुनिना प्रतीत ।
महाद्युतिर्वीर्यगुणोपपन्नो
वचो मुनेरुत्तममाचचक्षे । [10]

[(1 1) V योत्स्यति (for °सि) —(1 2) B2 सदा (for तदा) —(1 4) V B3 D5 7 खड्ग स, B2 खड्गौ च (for खड्ग च) —(1 6) V B1 2 4 शक्रेण दत्तेपि च कुण्डले स (metri causa), B3 शक्रेण दत्ते अपि कुण्डले द्वे (also स for द्वे *sup lin*) —(1 7) B2 प्रतिपूज्य (for प्रतिगृह्य) —(1 8) Ñ2 D5 7 महाप्रभाव, B4 °प्रधान (for °प्रदान) —(1 10) B1 उत्तरमाचकाक्षत (hypm), B4 उत्तममाचकाक्ष]

—After 34, G3 ins a long passage relegated to App I (No 3)

Colophon D1 om (cont the Sarga) —*Sarga name* Ś1 आयुधप्रदान, Ñ1 आयुधप्रदानिक, Ñ2 D5 धनुर्दान, V B धनु प्रदान, D2 3 आयुधप्रदान, D7 अगस्त्यधनुर्दान —*Sarga no* (figures, words or both) Ś1 Ñ1 B1 Dt1 D2 om, Ñ2 B3 D7 18, V1 17, V2 B2 4 D5 19, D3 20, Dg1 Dm1 D4 6 8 S 12 G concludes with श्रीरामाय नम —After colophon, M1 3 ins App 1 (No 3)

12

D1 continues the previous Sarga D8 begins with ॐ, T2 with श्रीरामचन्द्राय नम —Before 1, Ñ2 V B D5.7 ins

217* पूजयित्वा यथान्याय दैवेन विधिना मुनि ।
प्रश्रित बहुविस्तारमगस्त्यो वाक्यमब्रवीत् ।

[(1 1) V दैवेन (for दै°) —(1 2) V B3 प्रसृत (V1 °तिं), B1 प्रथित (for प्रश्रित)], while D1 ins

218* स्नेहगद्गदया वाचा हर्षयिष्यन्रघूत्तमम् ।

1 ❀ Cg एतादृशस्थले सर्गविच्छित्तिर्वास्तीति प्रतीयते । कथाया अपर्यवसानात् ❀ —^{a}) Ś1 Ñ1 D1-3 ते पुत्र, M2 ते वत्स (for भद्र ते) Ñ2 V B D5 7 पुत्र प्रीतोस्मि ते राम —^{c}) Ñ1 अभि * . (1lleg) (for °वादयितु) Ś1 Ñ1 D1-3 यौ मा, V1 M2 यस्मात् (for यन्मा) —^{d}) Ś1 G3 प्राप्ता स्थ (sic), Ñ1 प्राप्तोसि, D4 T1 2 M1 सप्राप्तौ, T3 प्राप्तौ स्त (for प्राप्तौ स्थ) M1 किल (for सह) —After 1, B3 ins

219* अनेन कर्मणा तेऽद्य परितुष्टोऽस्मि राघव ।

2 ^{ab}) Dg1 D4 6 8 वा (for वा) M2 वश्चेतो (for वा खेदो) Ś1 D1-3 अप्या (D1 3 °था, D2 °ध्व) श्रमे न व (D1 च) खेदो वने प्रचुरपादपे, Ñ1 आश्रमे च त्वया स्थेय वने च प्रचुरोदके —B3 reads 2^{cd} in marg —^{c}) Dm1 D8 G3 देवी (for चापि) Ś1 D1 3 सा (D3 न) चो (D1 नो) त्कठति वैदेही, Ñ1 D2 मा चोत्कठेत वै (Ñ1 °* . . * [1lleg]) देही, B3 उच्चैर्नोत्कठिते चापि, M2 अपि नोत्कठते चेय —^{d}) B3 भर्तृदेविका (for जनकात्मजा) Ś1 Ñ1 D1-3 लक्ष्मणो वापि राघव —For 2, Ñ2 V B1 2 4 D5 7 subst, B3 subst for 2^{ab} only

220* अपि श्रमो न वैदेह्यां बाधते रघुनन्दन ।

[V1 आश्रमोय (for अपि श्रमो) B3 repeats erroneously from मो up to रघुनन्दन in marg V1 B3 4 वेदेह्या (B4 °ह्या) (for वैदेही) V1 रोचते, B3 बाध्यते (for बाधते)]

Arya Research Team

G 3 19 3
B 3 13 3
L 3 17 3

एषा हि सुकुमारी च दुःखैश्च न विमानिता ।
प्राज्यदोषं वनं प्राप्ता भर्तृस्नेहप्रचोदिता ॥ ३
यथैषा रमते राम इह सीता तथा कुरु ।
दुष्करं कृतवत्येषा वने त्वामनुगच्छती ॥ ४
एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन ।
समस्थमनुरज्यन्ते विषमस्थं त्यजन्ति च ॥ ५
शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा ।
गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ॥ ६
इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता ।
श्लाघ्या च व्यपदेश्या च यथा देवी ह्यरुन्धती ॥ ७
अलंकृतोऽयं देशश्च यत्र सौमित्रिणा सह ।
वैदेह्या चानया राम वत्स्यसि त्वमरिंदम ॥ ८
एवमुक्तस्तु मुनिना राघवः संयताञ्जलिः ।
उवाच प्रश्रितं वाक्यमृषिं दीप्तमिवानलम् ॥ ९

---

3 [a]) Dg1 Dt1 Dm1 D6 8 T3 G3 च (for हि) Ñ2 V B D5 7 सीता हि(V1 च) सुकुमारागी —[b]) Ñ2 V B1 2 D5 7 सुखैश्, Dm1 D8 Ct खेदैश्, Ctp as in text (for दुःखैश्) Ñ2 D5 7 विनाकृता (for विमानिता) Ś1 सुखैः समानिता सदा, Ñ1 राजपुत्री यशस्विनी, B3 D1 सुखैश्वर्यवि°, B4 (marg also सुखैश्वर्यविराजिता) न सुखेन विमानिता, D2 सुखैश्च मानिता सदा, D3 सुखैश्चैव विवर्धिता, T3 दुःखैश्चानपमानिता —D6 reads 3[cd] in marg —[c]) Ñ2 V B D5 7 बहुदोष (for प्राज्यदोष) D5 प्राप्त (for प्राप्ता) Ś1 Ñ1 D1–3 प्रीत्याश्रमपद प्राप्ता —[d]) Dg1 भर्तु (for भर्तृ-) Ś1 D1 2 भर्तृस्नेहेन नोदिता

4 [ab]) Note hiatus between [a] and [b] G2 [ए]व (for [ए]षा) M2 चेह (for राम) Ś1 Ñ1 D1–3 यथेह साध्वी(Ś1 D2 भार्या) रम(D3 चर)ते, Ñ2 V B D5 7 यथा रमेत वैदेही (for [a]) Ś1 Ñ1 D1–3 M2 सीता राम, Ñ2 V B D5 7 वने राम (for इह सीता) G1 transp राम and सीता —After 4[ab], M3 ins

221* यदुक्तमनया राम क्रीडार्थं तत्कुरुष्व ह ।

—[c]) Ś1 दुष्कृत (for दुष्कर) Ñ2 V B D5 7 हि करोति, M3 कुरुते तु (for कृतवती) —[d]) M2 वन (for वने) Ś1 तीक्ष्णता यथा, Dg1 T3 Cm अधिगच्छति(T3 °ती), Dt1 D6 अभिगच्छती, D1–3 न जहाति या, G1 M2 अनुगच्छति, M3 अभिगच्छति (for अनुगच्छती) Ñ1 व r . * गाम ह (illeg), Ñ2 V B D5 7 त्वत्कृते वनमागता

5 Ś1 D3 om 5[a]–6[b] —[a]) D2 च, L(ed) [अ]त्र (for हि) Ñ1 सत्कृता (for प्रकृति) —[b]) Ñ1 पृथिव्या पुरुषर्षभ, D1 2 सृष्टिश्च पुरुषर्षभ —For 5[ab], Ñ2 V B D5 7 subst

222* प्रकृतिर्हि सदा स्त्रीणा भीरुत्व क्लैब्यमेव च ।

[D5 व्यक्तम् (for क्लैब्यम्) B3 भीरुत्वेक्लैब्यमेव च (for the post half)]

—[c]) Ñ1 D1 2 पदस्थम्, G1 3 समर्थम् (for समस्थम्) B1 अनुरज्यति, Dg1 D4 T G1 2 M °रज्यति(D4 °ती), Dm1 D8 G3 Cm °रजति, G(ed) °रुध्यते (for °रज्यन्ते) —[d]) G1 असमर्थं (for विषमस्थ) —After 5, Ñ2 V B D5 7 ins

223* स्वभाव एष हि स्त्रीणा सृष्टिश्च पुरुषर्षभ ।

[cf 5[ab] Ñ2 V2 सुभाव (for स्वभाव)]

6 Ś1 D3 om 6[ab] (cf v l 5) —[b]) Ñ1 illeg, Ñ2 V B D5 7 चैव(B1 2 चापि) तीक्ष्णता(V °ता), D1 तीक्ष्णता तथा, D2 °ता यथा (for तीक्ष्णता तथा) —[c]) Ś1 Ñ V B D1–3 5 7 दहन-(for गरुड-) D6 -[अ]नलयो (for -[अ]-निलयो) Ś1 D1 शीघ्रम्, Ñ2 B2 Dg1 Dm1 शैघ्रम्, D3 शीलम्, M3 वेगम् (for शैघ्र्यम्) —[d]) Ś1 Ñ2 V B D1 2 5 7 M2 अनुकुर्वंति, D3 °वर्तत (for °गच्छन्ति) —After 6, Ś1 Ñ1 V2 D1–3 ins

224* न तथा कालकूट हि विष हन्याद्यथा स्त्रिय ।

7 [a]) V1 हि, B3 च (for तु) D6 om भवतो —[b]) B3 (with hiatus) एभिर्दोषैर् (for दोषैरेतैर्) —[cd]) B4 (marg also) कुलीना रूपसपन्ना (for [c]) Ś1 Dm1 D2 8 G M2 3 देवी तु, Ñ2 V B1 2 4 Dg1 Dt1 D1 3 6 T3 देवेषु (for देवी हि) Ñ1 श्लाघ्यैरेषा गुणैर्युक्ता यथा चापि अरुधती

8 [a]) Ś1 Ñ1 D1–3 स (for sय) Ñ2 V B D5 7 अय (D5 °पि) ह्य(V1 त्व)लकृतो देशस् —[b]) Ñ2 V B D5 7 त्वया (for यत्र) —Dg1 Dm1 D8 G3 repeat erroneously 8[cd] after 14[ab] —[c]) Ś1 Ñ1 V1 D1–3 सार्धं, Ñ2 V2 B D5 7 साध्व्या (for राम) —[d]) M3 वससि (for वत्स्यसि) Ś1 Ñ1 D1–3 रस्यसे रघुनन्दन, Ñ2 V2 B D5 7 वसतेह(B3 4 °स चेह) ममाश्रमे, V1 वस त्व हि ममाश्रमे —After 8, Ś1 V2 D1–3 ins

225* तारितश्च त्वया राजा सत्पुत्रेण रघूत्तम ।

[D3 सुपुत्रेण त्वया राजा (for त्वया राजा सत्पुत्रेण)],
while D4 T1(both l 1–18 only) 2 (l 1–18 after 8 and l 19–23 after 9) G2 ins App 1(No 3) after 8

9 [a]) V1 Dm1 D4 8 T1 2 G1 3 M1 3 स (for तु) G2 स तथा राघव श्रीमान् —[b]) G2 अगस्त्य (for राघव) Ś1 B4 स कृताजलि, Ñ2 V B1–3 D2 3 5 7 सहताजलि, D1 सहतागुलि (for सयताञ्जलि) Ñ1 स रामो वै कृताजलि —Dg1 om 9[cd] —[c]) Ś1 प्रश्रितो, Ñ1 स महा-, V1 B3 D1 3 प्रसृत (for प्रश्रित) —[d]) Ś1 D2 3 मुनि (for ऋषि) Dm1 तप्तम् (for दीप्तम्) Ñ1 T2 [अ]निल (for [अ]नलम्).

Arya Research Team

धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुंगवः ।
गुणैः सभ्रातृभार्यस्य वरदः परितुष्यति ॥ १०
किं तु व्यादिश मे देशं सोदकं बहुकाननम् ।
यत्राश्रमपदं कृत्वा वसेयं निरतः सुखम् ॥ ११
ततोऽब्रवीन्मुनिश्रेष्ठः श्रुत्वा रामस्य भाषितम् ।
ध्यात्वा मुहूर्तं धर्मात्मा धीरो धीरतरं वचः ॥ १२
इतो द्वियोजने तात बहुमूलफलोदकः ।
देशो बहुमृगः श्रीमान्पञ्चवट्यभिविश्रुतः ॥ १३
तत्र गत्वाश्रमपदं कृत्वा सौमित्रिणा सह ।
रमस्व त्वं पितुर्वाक्यं यथोक्तमनुपालयन् ॥ १४
विदितो ह्येष वृत्तान्तो मम सर्वस्तवानघ ।
तपसश्च प्रभावेन स्नेहाद्दशरथस्य च ॥ १५
हृदयस्थश्च ते छन्दो विज्ञातस्तपसा मया ।
इह वासं प्रतिज्ञाय मया सह तपोवने ॥ १६
अतश्च त्वामहं ब्रूमि गच्छ पञ्चवटीमिति ।
स हि रम्यो वनोद्देशो मैथिली तत्र रंस्यते ॥ १७
स देशः श्लाघनीयश्च नातिदूरे च राघव ।
गोदावर्याः समीपे च मैथिली तत्र रंस्यते ॥ १८

G 3 19 19
B 3 13 18
L 3 18 11

Ñ$_2$ V B D$_{5\,7}$ तमृषि सत्यविक्रम —After 9, Ś$_1$ D$_{1-3}$ ins 1 35-82 of App I (No 3)

10 ^{a}) B$_{1\,2}$ च (for second ऽस्मि) —^{b}) D$_1$ वै (for मे) B$_4$ D$_{2\,4}$ G$_{2\,3}$ M$_1$ मुनिपुगव, M$_2$ भगवान्स्वय (for मुनिपुगव) —^{d}) Ś$_1$ Ñ V B D$_{5\,7}$ सुतोष, Dt$_1$ D$_6$ गुरुर्न, D$_{1\,3}$ तुतोष, D$_2$ सतोष (for वरद) D$_1$ परमद्युति, D$_3$ (sic) $_8$ G M$_1$ परितुष्यसि (D$_3$ °से) —After 10, M$_2$ ins App I (No 3)

11 ^{a}) Ñ$_1$ कृतश (sic) (for व्यादिश) B$_1$ मा (for मे) —^{b}) Ś$_1$ Ñ$_1$ D$_{1-3}$ बहुपादप —Dg$_1$ reads 11^{cd} in marg —^{c}) Ñ$_2$ Dg$_1$ D$_{5\,7}$ यदा, V$_1$ B$_2$ यथा, B$_1$ तत्र, M$_2$ अत्र (for यत्र) D$_1$ G$_1$ गत्वा (for कृत्वा) Ñ$_1$ इच्छेयमाश्रम कर्तुं —^{d}) Ś$_1$ D$_{2\,3}$ वसेम, Dg$_1$ वसेह, D$_1$ वसेमो (sic) (for वसेय) Ś$_1$ D$_{1-3}$ निरता, Ñ$_1$ यत्र वै, D$_{4\,5\,7}$ T$_{1\,2}$ नियत (for निरत) Ñ$_2$ V$_2$ B$_{3\,4}$ D$_{5\,7}$ सुखी

12 ^{b}) Ñ$_2$ V B D$_{5\,7}$ तद्वच, M$_2$ धीमत (for भाषितम्) Ñ$_1$ श्रुत्वा राघवभाषित —After 12^{ab}, T$_2$ ins

226* एवमुक्तस्तु रामेण महर्षिरिदमब्रवीत् ।

—^{c}) B$_3$ (marg also) सद्वृत्त (for मुहूर्तं) —^{d}) Ś$_1$ Ñ$_1$ वीरो, Ñ$_2$ V B D$_5$ धीमान्, D$_7$ om (for धीरो) V$_2$ प्रियतर Dt$_1$ D$_6$ ततोवाच वच शुभ ❀ Ct तत उवाचेत्यर्धं सधिरार्ष ❀

13 ^{a}) Ñ$_2$ हि योजने, B$_3$ द्वियोजन, Dg$_1$ [ऽ]पि योजने, D$_{1\,2}$ [ऽ]र्धयोजने (for द्वियोजने) Ñ$_2$ V$_1$ B D$_{5\,7}$ राम (for तात) —^{b}) Ś$_1$ Ñ$_1$ V$_2$ D$_{1-3}$ M$_2$ -फलद्रुम (for -फलोदक) Ñ$_2$ V$_1$ B D$_{5\,7}$ स्वादुमूलफलैर्युत (V$_1$ B$_{2\,3}$ °लान्वित, B$_4$ °लायुत) —^{c}) Ś$_1$ Ñ$_1$ D$_{1-3}$ बहूदक, Ñ$_2$ V B D$_{5\,7}$ शुचिजल, M$_3$ बहुमत (for बहुमृग) —^{d}) Ś$_1$ Ñ$_1$ V D$_{1-3}$ पचव (V$_1$ °चवा, D$_{1\,2}$ [after corr] °चाव)-टिरिति श्रुत, Ñ$_2$ B$_1$ D$_{5\,7}$ पचवटीति विश्रुत, B$_{2-4}$ ख्यात पचवटीति वै

14 ^{a}) G$_1$ कृत्वा तत्र (for तत्र गत्वा) Ś$_1$ Ñ$_1$ D$_{1-3}$ तत्राश्रमपद कृत्वा, Ñ$_2$ V B$_{1-3\,4}$ (also गच्छ त्व तत्र गत्वा च) D$_{5\,7}$ तत्र गत्वाश्रम कृत्वा (B$_2$ राम) —^{b}) Ś$_1$ Ñ V B$_{1\,3\,4}$ D$_{1-3\,5\,7}$ G$_1$ राम (for कृत्वा) —After 14^{ab}, Dg$_1$ Dm$_1$ D$_8$ G$_3$ repeat erroneously 8^{cd} —Dg$_1$ reads 14^{cd} in marg —^{c}) Ś$_1$ Ñ V B D$_{1-3\,5\,7}$ M$_{1\,2}$ निवस, Dg$_1$ (before corr as in text) D$_4$ T$_{1\,2}$ रस्यसि, K(ed) रस्यसे (for रमस्व) Ś$_1$ Ñ$_1$ D$_{2\,3}$ स्व-, D$_8$ M$_3$ त, T$_3$ च (for त्व) —^{d}) Ś$_1$ Ñ$_2$ V$_2$ B$_{3\,4}$ D$_{5\,7}$ M$_2$ परिपालयन् (for अनुपालयन्) —After 14, K(ed) repeats 1 26-30 of App I (No 3)

15 ^{a}) Ñ$_2$ V B D$_{5\,7}$ चैव (for ह्येष) —^{b}) M$_3$ मया (for मम) S$_1$ Ñ$_1$ D$_2$ तव (Ñ$_1$ राम) सर्वं (D$_2$ °र्व) स्वय मम, Ñ$_2$ V B D$_{5\,7}$ तव सर्वो मयानघ (B$_4$ marg, orig °मोत्तम), D$_1$ [ऽ]नघ सर्व समाधिना, D$_3$ [ऽ]नघ सर्व स्वय मम —^{c}) Ñ$_1$ V$_2$ B प्रभावेण —^{d}) D$_4$ T$_{1\,2}$ हार्दाद् (for स्नेहाद्)

16 ^{a}) Dt$_1$ G$_2$ Ct हृदयस्थ च, T$_3$ G$_3$ हृदयस्थस्य, M$_2$ हृदयस्य च (for हृदयस्थश्च) Ś$_1$ Ñ$_1$ D$_{1-3}$ ते भावो, V$_1$ भावस्ते, T$_2$ मे छदो (for ते छन्दो) Ñ$_2$ V$_2$ B D$_{5\,7}$ हृदतश्चैव भावस्ते —^{b}) Dt$_1$ D$_6$ Ct विज्ञात (for विज्ञातस्) M$_2$ तपसो (for तपसा) —V$_1$ om 16^{cd} —^{c}) Ś$_1$ V$_2$ D$_{1-3}$ इह वा वस काकुत्स्थ —After 16, Ś$_1$ V$_2$ D$_{1-3}$ ins

227* अथेह नेच्छसे वासमन्यदेशनिवासिनाम् ।

[V$_2$ D$_3$ अथवा (for अथेह) D$_1$ नेच्छति, D$_3$ मन्यसे (for नेच्छसे) V$_2$ वस्तुम्, D$_1$ स्थातुम् (for वासम्) D$_{1\,2}$ -निवासनात् V$_2$ D$_3$ अन्यदेश (V$_2$ °श)निवासने (for the post half)], while Dm$_1$ D$_8$ G$_{1\,2}$ M ins

228* वसन्त त्वा जना सर्वे ज्ञास्यन्ति रघुनन्दन ।

